# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा –एप्रिल - 2019

**कक्षा – शास्त्री (SEM-6)** | **प्रश्नपत्रम् – 6** | गुणाः –70

विषयः – पुराणेतिहासः | **कोड –C.E.3.6.12** | समयः - 11 तः 2 पर्यन्तम्

दिनाङ्कः –04/04/2019 | सन्दर्भग्रन्थः – महाभारतम्-शान्तिपर्व-आपद्धर्मपर्व

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः-1 द्वयोः पद्ययोः सप्रसङ्गं विवेचनं कुरुत। 10**

(1) यश्चतुर्गुणसम्पन्नं धर्मे ब्रूयात् स धर्मवित्।
अहेरिव हि धर्मस्य पदं दुःखं गवेषितुम्॥

(2) अमित्रो मित्रतां याति मित्रं चापि प्रदुष्यति।
सामर्थ्ययोगात् कार्याणामनित्या वै सदा गतिः॥

(3) न धर्मवचनं वाचा नैव बुद्ध्येति नः श्रुतम्।
इति बार्हस्पतं ज्ञानं प्रावाच मघवा स्वयम्॥

**प्रश्नः-2 बिडालमूषकाख्यानं यथाग्रन्थं विवेचयत। 10**

**अखवा**

**राज्ञः ब्रह्मदत्तस्य एवं पूजनीनामकचटकायाः संवादं प्रतिपादयत।**

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः-3 द्वयोः पद्ययोः सप्रसङ्गं विवेचनं कुरुत। 10**

(1) यज्ञो दानं दया वेदाः सत्यं च पृथ्वीपते।
पञ्चैतानि पवित्राणि षष्ठं सुचरिते तपः॥

(2) सर्वोपकारिणो वीराः सर्वधर्मानुपालकाः।
सर्वभुतहिताश्चैव सर्वदेवाश्च भारत॥

(3) धर्मस्य ह्रियमाणस्य लोभग्रस्तैर्दुरात्मभिः।
या या विक्रियते संस्था ततः सापि प्रपद्यते॥

**प्रश्नः-4 इन्द्रोतमुनिप्रसङ्गं यथाग्रन्थं लिखत। 10**

**अथवा**

**कामक्रोधादिदोषान् तथा तन्निवारणोपायान् यथाग्रन्थं विवेचयत।**

## तृतीयान्वितिः (Unit-3)

**प्रश्नः-5 द्वयोः पद्ययो: सप्रसङ्गं विवेचनं कुरुत।** **10**

(1) तपसो बहुरूपस्य तैस्तैद्वारैः प्रवर्ततः।
निवृत्या वर्तमानस्य तपो नानशनात् परम्॥

(2) सत्यं धर्मस्तपो योगः सत्यं ब्रह्म सनातनम्।
सत्यं यज्ञः परः प्रोक्तः सर्वं सत्ये प्रतिष्ठीतम्॥

(3) धर्मार्थकामाः सममेव सेव्या यो एकभक्तः स नरो जघन्यः।
तयोस्तु दाक्ष्यं प्रवदन्ति मध्यं स उत्तमो योऽभिरतस्त्रिवर्ग॥

**प्रश्नः-6 आपद्धर्मान् वर्णयत।** **10**

**अथवा**

**दिव्यबलकृतं गौतमातिथ्यं वर्णयत।**

### अन्वितयः १-३

**प्रश्नः-7 दशानां प्रश्नानां लघूत्तराणि लिखत।** **10**

(1) आपद्धर्मपर्व कस्मिन् पर्वणि अस्ति?
(2) आपद्धर्मपर्वणि कति अध्यायाः?
(3) सौवीरदेशस्य राज्ञः नाम किम्?
(4) केन विना गृहं अरण्यम्?
(5) जन्मेजयः कस्य पुत्रः?
(6) अश्वमेधयज्ञः केन कृतः?
(7) दु माधमः नाम कः?
(8) शां तनुपुत्रः कः?
(9) दमः इत्यस्य कोऽर्थः?
(10) लोभात् किं उद्भवति?
(11) माद्रीनन्दनः कः?
(12) बकराजस्य नाम किम्?
(13) महाभारते कः मुख्यः नायकः?
(14) आपद्धर्मपर्वणि मुख्यः वक्ता कः?
(15) महाभारतस्यापरं नाम किम्?